# संस्कृतवार्ता:

**दिनाङ्क :-13.09.2025** **प्रात: - 06:55**

**अथ वार्ता:**

## पीएम-उत्तर-पूर्व यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य मिजोरम्-मणिपुर-असम-राज्यानां यात्रायां भविष्यति यत्र सः बहुविध-विकास-परियोजनानां शिलान्यासं, उद्घाटनम् च करिष्यति। श्रीमोदी सर्वादौ मिजोरम्-राज्यं गमिष्यति यत्र सः अद्य प्रातः आईजोल्-नगरे नव सहस्रकोटिरूप्यकाणां विविध-विकास-परियोजनानां शिलान्यासं उद्घाटनं च विधाष्यति। सः तत्र एकां जनसभाम् अपि सम्बोधयिष्यति। प्रधानमन्त्री बैराबी-सैराङ्ग-नूतनरेलमार्ग परियोजनायाः उद्घाटनम् अपि करिष्यति। इतिहासे प्रथमवारं एतत् रेलमार्गं मिजोरम्-राज्यस्य राजधानीम् आईजाल्-नगरं भारतीयरेलमार्गजालेन सह संयोजयिष्यति। केन्द्रीयरेलमन्त्री अश्विनी वैष्णवः अवदत् यत् एषा परियोजना मिजोरम्-राज्यस्य जनानां जीवने महत्त्वपूर्णानि परिवर्तनानि आनयिष्ति।

ततः परं प्रधानमन्त्री मणिपुरं गत्वा अष्टशताधिक-शतकोटि-रूप्यकाणां अनेकाषां विकासपरियोजनानां शिलान्यासं उद्घाटनं च करिष्यति। प्रधानमन्त्री मोदी तदनंतरम् असम्-राज्यं गत्वा अद्य सायङ्काले गुवाहटी-नगरे भारतरत्न-डॉ. भूपेन्द्र-हजारिका-वर्यस्य शततमस्य जन्मवार्षिकोत्सवे भागं ग्रहीष्यति।

## नेपाल-प्रधानमन्त्री

पूर्वमुख्यन्यायाधीशा सुशीला कार्की इत्येषा नेपालस्य अन्तरीमसर्वकारस्य नेतृत्वं कुर्वन्ति प्रथमा महिला प्रधानमन्त्री अभवत्। अवधेयं यत् के. पी. ओली इत्यनेन स्वसर्वकारस्य विरुद्धं बृहत् भ्रष्टाचार-विरोध प्रदर्शनानन्तरं स्वपदात् त्यागपत्रं प्रदत्तम्। जेन्-जी-प्रदर्शनकारिणां राष्ट्रपतेः रामचन्द्रपौडेलस्य सेनाप्रमुखस्य अशोकराज सिगडेलस्य च मध्ये सर्वसम्मत्याः अनन्तरं एष: निर्णयः कृतः। सुश्री कार्की नेपालदेशस्य प्रथमा महिला मुख्यन्यायाधीशा आसीत्।

## प्रधानमन्त्री ज्ञानभारतम्

प्रधानमन्त्री श्रीनरेन्द्रमोदी गतसायं नवदिल्ल्यां ज्ञानभारतमित्यस्मिन् विषये अन्ताराष्ट्रियसम्मेलने भागम् अभजत्। सः पाण्डुलिप्याः अङ्कीकरणस्य, संरक्षणस्य, जनपरिवेषणस्य च त्वरितरूपेण निष्पादनाय समर्पितं ज्ञानभारतम् पोर्टल् इति डिजिटलमञ्चस्य शुभारंभोपि कृतवान्, अथ अस्मिन् अवसरे सभामपि सम्बोधितवान्।

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, ज्ञानभारतं मिशनेति भारतस्य संस्कृतेः, साहित्यस्य, चेतनायाः च स्वरः भवितुं सज्जः अस्ति। अन्ताराष्ट्रियसम्मेलने जनसमूहं सम्बोधयन् श्रीमोदी अवदत् यत्, भारते विश्वस्य बृहत्तमः प्रायः एककोटि पाण्डुलिपयः सन्ति।

तेनोदीरितं यत् सम्पूर्णे इतिहासे प्रायः कोटिशः पाण्डुलिपयः नष्टाः अभवन्। परञ्च अवशिष्टाः पाण्डुलिपयः प्रदर्शयन्ति यत् अस्माकं पूर्वजाः ज्ञाने, विज्ञाने, शिक्षणे च कियन्ति समर्पिताः आसन्।

अवधेयम्, यत् "पाण्डुलिपिपरम्परायाः माध्यमेन भारतस्य ज्ञानपरम्परायाः पुनः प्राप्तिः" इत्यस्मिन् विषये परह्यः एव त्रिदिवसीयसम्मेलनस्य आरम्भः अभवत्।

## नैशनल पेमेंट कॉरपोरेशन ऑफ इंडिया (एनपीसीआई)

नैशनल-पेमेंट-कॉरपोरेशन-ऑफ-इंडिया-(एनपीसीआई) इत्यनेन ग्राहक-व्यापारी इत्येतयोः मध्ये यूपीआई माध्येमेन धन-हस्तांतरण सीमायां महत्वपूर्णं संशोधनं कृतम्, यत् अस्य मासस्य पञ्चदश-दिनाङ्कात् प्रवर्तितः भविष्यति। उपयोगकर्ता अधुना सत्यापित श्रेणिभ्यः एकस्मिन्नेव दिने दशलक्ष रुप्यकाणि यावत् यूपीआई माध्यमे प्रदातुं शक्नोति।

## विश्व-ऐथलेटिक्स्-चैम्पियन्शिप

विंशतितमं विश्व-ऐथलेटिक्स्-चैम्पियन्शिप प्रतिस्पर्धा अद्य जापान्-देशस्य टोक्यो-नगरे आरभ्यते। अस्मिन् मासे अष्टादश दिनाङ्कपर्यन्तं स्पर्धा प्रचलिष्यति।

**।।इति वार्ता:।।**